No. ४४ ख

Title सिद्धान्तकौमुदीटीका फक्किकाप्रकाश:

Author इन्द्रदत्त उपाध्याय:

Extent ८ पत्र Age

Subject व्याकरण

१

नचहूर्हं प्रत्याहार एव मुख्यं फलमित्याशयेनाह। अणादिसंज्ञार्थानीति। अण् आदिर्येषां इति तद्गुणसंविज्ञानो बहुव्रीहिः ला
घवतः संज्ञाश्च ता एवार्थः प्रयोजनं येषां तानि अणादिसंज्ञाभ्यः इमानि इति वा संज्ञार्थत्वं निष्पत्तये तत्प्रकारकं मनुक्रा
मति॥ हयवमिति॥ चतुर्दशसूत्राण्यनन्तिमावर्णानि हलन्त्यमिति वक्ष्यमाणसूत्रेणेत्संज्ञास्युरित्यर्थः एतदेवा क्यार्थेना
प्राप्तेराह। अकारश्चेति। रप्रत्याहारार्थमनुनासिकत्वेन प्रतिज्ञातः। उपदेशेऽजित्यनेनेत्संज्ञक इत्यर्थः। ननु हये
त्यत्र वकारोच्चारणेनाकारविशिष्टस्यैव तत्तत्प्रत्याहारेषु ग्रहणे रामो हिनस्ति सम्राड्वचनमित्यादौ हमि शिचेत्युत्वा
दिकं न स्यादत आह॥ हकारादिष्विति। नयुनरन्तरेण चं यंजनस्योच्चारणमपि संभवति इत्युच्चैरुदात्त इति सूत्रभाष्ये
ण प्राथम्यादकारेणैव वै हल उच्चारितो ननु अकारो विवक्षित इति भावः॥ हयेत्यादावकारोच्चारणेन तस्य हलत्व
प्रसंग इत्यवतरणं तु न रम्यम् यकारादिवत्सहकृदुच्चारयितव्ये यौनः पुण्येनाकारोच्चारणेऽहलत्वप्रसंगभंगादित्याहुः॥
इति हल्संज्ञायामिति। आभ्यां सूत्राभ्यां हल्मात्रसंज्ञायां सिद्धायामित्यर्थः सत्यस्मिन्नेतेनेतरसंज्ञावसरं सूचयति॥ अयंभावः
नविभक्तावित्यादीनां सार्थक्योपपत्तये हलन्त्यमित्यस्योपदेशेऽन्त्यं हलित्संज्ञं स्यादिति वाक्यार्थ आवश्यकः स च वाक्यार्थबु
द्धौ पदार्थबुद्धिः कारणमिति हल्पदार्थबोधमंतरा बाधितः हल्पदार्थबोधश्चादिरन्त्येनेत्येतद्वाक्यार्थपरतंत्रः आदिरं
त्येनेत्येतद्वाक्यार्थबोधं विना बाधितः इत्यपदार्थबोधश्च हलन्त्यमित्येतद्वाक्यार्थाधीन इति हलन्त्यमादिरन्त्येनेत्यनयोः
परस्परापेक्षत्वेनान्योन्याश्रयदोष आपद्यते॥ तदेतदितरेतराश्रयं भवति इतरेतराश्रयाणि कार्याणि न प्रकल्पन्ते इ
ति तु कं भाष्ये॥ अत समर्थयंते। उपदेशे इदन्त्यम्, अच्, अनुनासिकः, इति सूत्रत्रयमस्तु। उपदेशेऽन्त्यमित्यादिरिति

प्रथमयोगार्थः सामर्थ्यादित्यमिति न संबध्यते तेन उपदेशेऽजित्संज्ञ इति द्वितीयसूत्रार्थः अजित्यनुवर्तते पूर्वेण सिद्धे नियमार्थस्तृतीयो योगः॥

शि॰वः॰ १

॥ आगमोऽस्य नु धातेन ह्यर्थसंगेन प्रत्ययः आदेशस्तु प्रसंगेन लोपः सर्वापकर्षणात् ॥१॥

॥ ॐ श्रीगणेशाय नमः ॥ संवास्य मास्य कंजालिं हरिं हृदयपंकजे सिद्धान्तकौमुदीगूढफक्किकार्थः प्रकाश्यते ॥१॥ गर्गवंशावतंसो
यो वैयाकरणकेशरी उपाध्यायोपनामेन्द्रदत्तस्तस्यैव सत्कृतिः ॥२॥ एतदेकमाचार्यस्य मंगलार्थं प्रयुक्तं मांगलिकआचार्यो महतः
शास्त्रौघस्य सैमंगलार्थं वृद्धिशब्दमादितः प्रयुंक्ते ॥ मंगलादीनि हि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुष
काणि च भवंति आयुष्मत्पुरुषकाणि च अध्येतारश्च वृद्धियुक्ताः यथा स्युः इति भाष्यम् सर्वं पाणिन्यनुक्रांतायां चतुर्द
शसूत्र्यामसमञ्जसैमाम्नाय समाम्नाय शब्दयोर्वेदे विदितत्वात्तस्यान्तर समाम्नाये इत्युद्दौ पासंगति श्चेत्यत आह तिस =
माहेश्वराणीति ॥ इमानि महेश्वरादागतानीत्यर्थः ॥ शास्त्रं पाणिनीयं पाणिनिनाबहुवरिवसित महेश्वर प्रसादलब्धा
नीति कलितम् ॥ एवं चैतादृशानुपूर्विका श्रुतिरेवैषा एतन्मूलकत्वादस्य व्याकरणस्य वेदांगत्वमुच्यते ॥ मुखं व्याकर
णमित्यादिना ॥ नृत्तावसाने नटराजराजो ननाद ढक्कां नवपंचवारम् उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिव
सूत्रजालम् ॥१॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ यद्यपि सोऽयमक्षरसमाम्नायो वाक्यसमाम्नायः
पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमंडितो वेदितव्यो ब्रह्मराशिः सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति माता
पितरौ चास्य स्वर्गे लोके महीयेते इति भाष्येण ॥ इदं ब्रह्मतत्वमेव शब्दरूपतया प्रतिभाति ॥ एतत्पठने सर्ववेदाध्य ५ ख=४
यनकृतस्य पुण्यस्य तैयत्फलं तत्प्राप्नोति । मातात्र्योतिशय शास्त्रस्येतत्फलाख्यानद्वारा ख्यायते इत्यादिकै
यटेन चास्याश्चतुर्दशसूत्र्याः फलमुक्तं तथाप्यदृष्टं तत् ॥ अथ किमर्थो वर्णानामुपदेशः । वृत्तिसमवायार्थः । का पु
नर्वृत्तिः ॥ शास्त्रप्रवृत्तिः इति भाष्ये कैयटेनोक्तं ॥ पाणिनेर्लाघवेन शास्त्रप्रवृत्त्यर्थः ॥ स चाणादिप्रत्याहारद्वारेति

= छंदः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते शिक्षा घ्राणं च
= वेदस्य मुखं व्याकरणं स्मृतम् तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते ॥२॥ =६

दृष्टो=५

प्रतिज्ञायते इति प्रतिज्ञा ॥ अनुनासिकस्य भावः आनुनासिक्यं पाणिनीयाः पाणिनिप्रभृतिप्रोक्ता वर्णाः ते प्रतिज्ञाविषयकाः अ-
नुनासिकवन्त इत्यर्थः प्रतिज्ञावाक्यमेवेति कथनं वर्णानां तत्त्वज्ञापको व्यवहारश्च ताभ्यामनुनासिकत्वज्ञानं सुलभमिति भावः ॥
२ येतु पाणिनीयाः पाणिनिशास्त्राध्येतारः प्रतिज्ञानुनासिक्यवन्त इत्यर्थमाहुस्तेमान्याः अनुनासिकधर्मस्य वर्णनिष्ठत्वादिति
2 दिक् ॥ उरण्रपर इत्यत्र लकारग्रहणाय लपरश्चेति वक्ष्यामीति भाष्यकृत्प्रतिज्ञायां कुत्रचिदपि तद्वचनानुल्लेखाद्वक्ष्या-
स्यामीति भाष्यकर्तुराशयमनुरुध्य व्याख्येयार प्रत्याहारोनुक्तां तत्तुल्यास्य सूत्रेके यरे न तत्वकारमत आप्याह ॥ लण्सूत्र-
स्थेति ॥ अत्रानुनासिकत्वेन प्रतिज्ञात [illegible] तीतिस्याः सचासावर्णश्चेतिनेत्यर्थः प्रत्याहारस्य आदिरन्त्येनेति वाक्या-
सू=७ र्थं सूचयति ॥ सहेत्यादि । ननु रलयोरिति नूनं रकारस्य मध्यस्थ्यगतेन रलानामित्युचितमत आह ॥ प्रत्याहारेष्विति ॥
प्रत्याह्रियन्ते लोके वर्णाः संक्षिप्यन्ते यत्रेति वाहुलकादधिकरणे घञ् ननु प्रकृतिप्रत्ययार्थभागबोधकत्वरूपया योगशक्त्या
कारादिष्वपि दीर्घादीनां संज्ञेपाज्ञेष्वपि तत्संज्ञात्वादतिव्याप्तिः ॥ मैवं ॥ प्रकृतिप्रत्ययार्थान्वितसमुदायार्थान्वितसमुदायार्थ-
बोधकत्वरूपया रूढशक्तेर्विवक्षितत्वेनाण्णादिष्वेव तत्सत्त्वेः ॥ निर्देशादिति ॥ ... तंज्ञिकानां तत्र नासिकादेयण्णाप्तिदो- प्रत्याहारे=५
षः इति भावः । नचेह विधानसामर्थ्यान्नयणिति वाच्यं तस्यापि प्रत्याहारेष्वनुबन्धग्रहणज्ञापनद्वारैव गुणभावकल्पक-
त्वौचित्यात्साक्षात्स्वबाधकल्पनापेक्षया [illegible] चित्यात् । आदिना पापाणे कुत्सितैः स्वकः पूर्वपरयोरित्यादिसं-
ग्रहः ननु प्रत्याहारेऽनुबन्धानां कथमग्रहणमिति ॥ आचारादप्रधानत्वाल्लोपश्च बलवत्तर इति भाष्योक्तवार्तिके प्र-
त्याहारशब्दस्यान्तरसमाम्नाये प्रसिद्धेः प्रत्याहारेष्वितीतामित्यनुपपन्नमत आह । आदिरन्त्येति ॥ नच वार्तिके असं-

तु=२

शिवः २

ह्रस्वे चेदिद्भवति तर्ह्यनुनासिक एवेति तदर्थः तेन रु प्रभृतौ न दोषः ॥ अनुनासिकश्चेदिद्भवति तर्हि नु च एवेति विपरीतनियम
स्तु न भवति मिदचोन्त्यात्परः इति ज्ञापकात् ॥ ननु सूत्रभेदे दृष्टेऽदृष्टकल्पना नि: पारायणादौ स्यात् तदुक्तं भाष्ये । सिध्यत्येवम
पाणिनीयं तु न भवति इति नैष दोषः ॥ सूत्रभेदं तमुपाचरन्ति यद्यत एवान्यत् क्रियते भूयो वा यदि तदेवोपसंहृत्य क्रियते ।
नासौ सूत्रभेदः इत्युक्तमचोऽपवर्गान्त इत्यत्र सप्तमे भाष्ये ॥ एवं च हकारे लण्सूत्रे णकारे मकर्तव्यं ॥ एवमन्योन्याश्रयदोषश्चा
पतः ॥ इत्येके तन्न सत् । योगविभागनियमज्ञापकाश्रये ऽपि प्रतिपत्तिगौरवदोषानुद्धारात् ॥ अपरे तु आदिरन्त्येनेति
सूत्रेण वेत्तित इज्ञानार्थं हलन्त्यमित्यस्य वाक्यार्थः । सह अास मन्ताद्भवतीति सहेता सं मध्यमो वर्णः सोन्त्ये
नादिश्चसंज्ञेति तदर्थात् एवं चनान्योन्याश्रयदोष इति तदप्यकिंचित्करम् ॥ अन्योन्याश्रयतत्परिहारादीन् वदता ।
भगवता इट किट कटी त्यत्र प्रश्लिष्टदीर्घ इणभ्यां च सहादु: पपदेत्यज भावं बोधनात् योगमुपदिश्य तदीयोक्ता
र्थलाभार्थं च हयवरेत्यादेराद्यस्याशावसरे त्यन्ते समुदायमुद्दिश्य हलित्यनेन हलसंज्ञा विधेया तेनान्योन्याश्रय इ
त्यपि केचित् तदतीव दोषकरं दशासूत्रार्थत्वे गौरवतमत्वात् तस्मादनेकक्लेशकल्पनापेक्षया न्याय्यत्वेनाद्यस्य सदो
षः परिह्रियते पुनरनुक्रमणमारभ्य इत्यार्थं वर्तितस्य हलन्त्यमित्यस्योपदेशे जित्यस्मादितमनुवर्त्य चतुर्दशसूत्रा ।
णामन्तिमस्य हलित्यस्यान्त्यो लकार इत्संज्ञः स्यादित्यर्थः नह्यत्रादिरन्त्येनेत्येतद्वाक्यार्थापेक्षास्ति ततश्चैतदर्थज्ञाने
आदिरन्त्येन इत्येतद्वाक्यार्थसाम्राज्यमित्येवं परिहृत्याऽन्योन्याश्रयदोषः ॥ उपदेश आद्योच्चारणमिति ॥ उपस्या द्या

नन्वेकारैकारयोः कंठतालुः स्थानं विवृतश्च प्रयत्नः तथौकारौकारयोः कंठौष्ठस्थानं प्रयत्नश्च विवृत एवेति तुल्यास्यसूत्रेण
परस्परं सावर्ण्यं स्यात् अत आह। सामर्थ्यादिति॥ न च स्वस्य तत्वोधनार्थं ईदैतदारंभोऽन्यथा तयोरसत्वं स्यादिति। ऋलृक्
सूत्रे भाष्येऽयं रीति इति वाच्यं सति तयोः सावर्ण्येऽकारेणानुपदिष्टदीर्घादीनामिव एङाऽपि तदुपदेशासंभवात्॥ ननु ए
चोरयवायावः ऋद्धिरादैच् नयाभ्यां वदान्ताभ्यांपूर्वौ तु ताभ्यामैच् इत्यादौ प्रत्याहाराग्र इति चेन्न एङोऽयवायाव इति
न्यासेऽपि स्थानेन्तरतमेनैव निर्वाहात् ऋद्धिरेङिति पठितिते अ एण्सूत्रे च परस्परं सवर्णसंज्ञावादिमते चतुर्णां ग्रहण
सत्वे प्रद्वेषात् नयाभ्यामित्यत्रैऔ इति स्वरूपेणैव पठनीयत्वात् एवं चैतदारम्भवैयर्थ्यात्सावर्ण्याभावज्ञापनं सुस्थं॥
यदि तु स्वराणामूष्मणां चैव विवृतं करणं स्मृतम्॥ तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव चेति शिक्षोक्तेन विवृततरविवृत
तमप्रयत्नद्वये नेङोरैचोश्च भेदः सिद्ध इति मते तदारम्भो न व्यर्थ एवेति वोध्यम्॥ नापादनीयमिति॥ तेन ग्लावं ग्लाव इत्यत्रै
तोम्शसोरिति न प्रवर्तते इति भावः। ननु विश्वपाभिरित्यत्रैदो तुल्यास्याऽणुदित्सूत्रयोर्वक्ष्यमाणार्थवोधोत्तरं निषेधसूत्रप्रवृत्तेर्दी
र्घैरप्यजिर्हलां सावर्ण्यवारणद्वारा रसक्तिः॥ किंच जातिपक्षे त्वजात्याक्रांतदीर्घादेरपि निषेधसिद्धिरिति। किमुक्ता
कारप्रश्लेषेणानर्थकेनेत्याशंक्य निषेधविधेः प्राग्ग्राहकविधिवोधबाधाद्ध्रस्वस्यैव निषेधविषयतादिति हलंत्यभाष्या
दिप्रामाण्येनात्र युक्तिपक्षस्यैवालंबनाच्च प्रश्लेषसाफल्यादित्याशयेनाह॥ यद्यपीति॥ नाज्झलाविति सूत्रभाष्यो
क्तवाक्यापरिसमाप्तिन्यायादित्यर्थः॥ तत्र हि प्रयत्नभेदे नाज्झलोः सावर्ण्याभावमभिधाय समाधानान्तरं वाक्यापरिसमाप्ते
र्वा पुनः सिद्धमेतत्। किमिदं वाक्यापरिसमाप्तेरिति॥ वर्णानामुपदेशस्तावत् उपदेशोत्तरकाले संज्ञा तदुत्तरकाल

पृ=१

अन्ये तु सतिर प्रत्याहारे अतोल्लोन्तस्येति सूत्रे लकारांसंगतिः । किंच एरूघटितसूत्रेषु वड्वर्द्धमात्रालाघवेन एप्रत्याहारेणैव प्रवत्ता-
स्यात् । तस्मात् लण्सूत्रगाकारानुनासिकत्व मप्रामाणिकम् अल्त्व सिद्यो दितिवत् लग्रहणं कर्तव्यमेव । उरण् सूत्रे इत्याहुः । ननु
स्पष्टप्रयत्नो दिभिरेव सकलवर्णानां व्याप्तत्वात्संवृतेन कुत्र भाष्यमतस्त्राह ॥ ह्रस्वस्येति । एवं तर्हि दण्डानयन मित्यादौ ह्रस्वस्यावर्ण-
स्य संवृते न दीर्घाकारेण प्रयत्नभेदात् सवर्ण दीर्घो न स्यादत आह । प्रक्रियादशायामिति ॥ साधनावस्थायामित्यर्थः ।
विवृतमेवेति ॥ तत्र विवृततत्वं प्रतिज्ञेयमित्यर्थः । एवंचोक्तप्रयोगे सवर्ण दीर्घः सिद्ध इति भावः ॥ ह्रस्वस्य प्रयोगे संवृतत्वे
सूत्रं प्रमाणयति अअ इति । सुपां सुलुगिति विभक्त्योर्लुक् आद्यो विवृतः द्वैपरः संवृत इत्याह ॥ विवृतमनूद्येति ॥ विवृ-
तस्य स्थाने इत्यर्थः ॥ अनेनेति । अअ इति सूत्रेणेत्यर्थः । एवंचोभयोरकारयोः प्रयत्नभेदात्सवर्णदीर्घो न । विवृतत्वमस्त्यें-
वेति तर्हि सवर्णदीर्घः स्यादिति चेन्न । पूर्वोक्तार्थज्ञापनार्थं तदभावात् । एतेषु परेष्विति । उपलक्षणमिदं मेतेषु विद्यमाने-
ष्वपि तेन हकारादीनामप्याकारादिषु दीर्घादिनेत्यर्थः । एतेन हरत्यादि षुचतुर्षु इकार ईकारयोः षकार सकारयो-
श्च सवर्णदीर्घस्य य एकदेशस्य चापादयितुं शक्यत्वेन दधीत्यस्येति यथार्थमित्यपास्तम् । अन्यथेति । नाज्झलावि-
त्यस्यानारम्भे ॥ अज्झं स्यादिति । अच्चपदवो ध्यत्वं स्यादित्यर्थः ॥ इदं प्रत्याहार घटके षपिवर्णेषु अहणक शास्त्रप्रवृ-
त्तिरितिमते युक्तिपक्षेच बोध्यमित्याहुः ॥ अत्रेति ॥ ग्राहक सूत्रगण्वेत्यर्थः ॥ व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहा-
दलक्षणमितिपरिभाषणादिति भावः ॥ एतच्चाणिएण प्रत्याहारे परेण पूर्वेणवाप्रत्याहार इति संदेहोज्ञास्सनाय । लण् सूत्रे
वर्णान्तरेणानुबंधे कर्तव्ये स णकारो ज्ञापयतीति भाष्ये स्पष्टम् । तदर्थन्तु विशेषस्यान्यतरात्रूपस्य प्रतिपत्तिर्निश्चयो या-

त्रि भि = २

द्यूर्थ = १

ऐं ना ष्ठिष्टकृतात् यतेः संदेहा ऋत्वे से मेल क्षण मनुष्या
पकं नहि भवतीति एव ल्वे । ऋए परे ऐव ग्न चि षायु धातु
ष्कवाभिति सूत्रे ऋएङ्त्येव ॥ ष्रिएयो दिति ऋ ऐ ऋ निर्देशाच्चेति
लाद्त्वत्र स्पष्टं भाष्ये इति दिक् ॥

तदुक्तम्॥ सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिने एकदेशविकारे हि नित्यत्वं नोपपद्यते इति। ननु सर्वादेशे सुतरां विकार इति चेन्न॥
अवयविनोऽवयवभंगरूपो विकारः सर्वादेशे चैं तदभावादिति तात्पर्यात्॥ उक्तं च वार्तिकैर्भेरूता॥ कार्यविपरिणामादेति। का
र्यमिह ज्ञानं योग्यता बलात् तथा ज्ञाननिष्ठमुत्पत्ति विनाशादिकमारोप्यते इत्यर्थः॥ इति कैयटादयः॥ एवं चेकारबुद्धिप्रसं
४ एए=४ गेयकारबुद्धि कार्येति बुद्धेरेव विपरिणामो नशदादीनाम्॥ किं च। शास्त्रमन्वाख्यायकमेव॥ तदुक्तं भाष्ये॥ नित्यशब्दा
र्थसंबंधे किमर्थं शास्त्रं निवर्तकत्वात्सिद्धमिति॥ असाधुशब्देभ्योऽन्वाख्यानद्वारा साधुशब्दबोधकमिति तात्पर्यं॥ साधुशब्दो
५ च्चारणेपुण्योदयः॥ एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञात स्वर्गलोके कामधुग्भवतीति भाष्ये श्रुतेः नित्याश्च शब्दा नित्येषु कूट
स्थैर विचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिरित्यइउण्सूत्रे भाष्योक्तमनेकशइति चिरस्मृतेऽस्माभिः॥ ननु ष्टा स्सस्यौ
शित्यत्र जश्शसोरिति स्थानषष्ठी श्रुत्याऽलोन्त्यस्येत्यनेनान्त्यादेशप्राप्तावपि अष्टाभ्य इति कृत्या तस्मादित्युत्तरस्येति परत्व बोध
नादादेः परस्येत्यनेनाऽलोन्त्यादेशबाधके न जश्शसोरादेरकारस्यौ शिरूपासिद्धिरतत्राह॥ परत्वादिति॥ विप्रतिषेध
हृगसत्वादिति भावः। आदेः परस्येत्यस्यावकाशः। द्वीयम् द्व्यन्तरुपसर्गेभ्योऽपाईत् अनेकाल्शित्सर्वस्य इतः, तसिल्,
इदम इश् आदिनाऽतो भिस ऐस् इत्यादावादेः परस्येति बाध्यते अनेकाल्शित्यनेनेत्यर्थः। अत एव तस्मादित्युत्तरस्येत्यग
तस्मादित्युत्तरस्यादेरिति नसूत्रं कृतं लाघवात्॥ तथासति तदेव परत्वादनेकाल्शित्यस्य बाधकं स्यादित्युक्तरूपासिद्धिः।
न चानेकाल्शित्यतः प्राक्पठ्यतां तस्मिन्निति निर्दिष्टे तस्मादित्युत्तरस्यादेरिति हृगदयमितिवाच्यम् आदेरित्यंशे षष्ठीस्थानेयोगेत्यस्या
संबंधे आन्नसेरसुगित्यादावप्यादेरिति प्रवृत्त्यापत्तौ देवास इत्यादिरूपासंगतेः अस्तु षष्ठीस्थाने इत्यस्यात्र संबंधः कोदोषः॥
एवं तर्हि मध्येपि तस्मिन्निति तस्मादित्यनयोरपि तत्संबंधे तयोरप्यागमविषये प्रवृत्त्यनापत्तेः इति दिक्॥ न चालोन्त्यस्येति
सिद्धे ङिच्चेति नियमार्थं ङिदेवानेकाल्ङ्त्यस्य न तु ङिदयीति हृत्यजमनेकाल्ग्रहणं इति शंक्यम् तद्ग्रहणाभावेऽतोभि

स्लेस् इत्यादावादेः परस्येति त्यस्यैव प्रवृत्यापत्तेः ननु
शिरेङ्ग्रहणं व्यर्थम् इदम इशित्यादौ शकारोच्चारणे
सामर्थ्याद्भूतपूर्वानेकालमादाय सर्वादेशत्वसिद्धेरिति
॥ चेत्सत्यम्॥

शिवः
४

पदित्यज्ञेत्यर्थः ।=२

अथ यदि समासेऽपि त्यस्य सवर्णसंज्ञाजन्यशक्तिग्रहे नाक्ताविव्येतद्रूपबाधकसंभावनया धायिता प्रामाण्यग्रहादणुदिदित्येत॰
दाकर्य्यार्थसामर्थ्यादिति एवं च प्रकल्प्य चापवाद विषयमुत्सर्गः प्रवर्तते पूर्वं हि अपवादा अभिनिविशन्ते पश्चादुत्सर्गः
सुक्तवंतं प्रतिब्रूयात् मा भुङ्क्थाः इत्येतैर्बाधकसंभावनया सवर्णसूत्रवाक्यार्थबोधानुपपत्त्या च विधिनिषेधसूत्रयो
रेकवाक्यता कार्या अकूल भिन्नं यत्तुल्यास्यं तन्मिथः सवर्णमित्युभयविधिबोधितसवर्णसंज्ञोत्तरं ग्राहकसूत्रवा
क्यार्थावतारः तथा च निषेधसूत्रेण गृहीतदीर्घादिभिरज्भिर्हल्लां निषेधकं पर्यवसन्नमित्याशयेनाह॰। अन्तरेति॥
अन्तराणां समाम्नायउपदेशसूत्राणि तत्रभवा वर्णचोतोदात्तादिति ढञ् अत एव कुमारी शेते इत्यादौ दीर्घशकारयोः साव
र्ण्यात् सवर्णदीर्घत्वं प्राप्तमची त्यनुवृत्त्या निवार्यते इत्युक्तमगकैयटे वक्ष्यति च मूले॥ तर्हि विश्वपाभिरित्यादौ कागतिरत आह॰।
आकारस्यापि प्रश्लिष्टत्वादिति॥ अत्र कालसमयवेलास्वित्यादिनिर्देशाल्लिंगात्॥ अपि नादीर्घात्परत्र प्लुतस्यापि प्रश्लेषः॥ तेन
हे यियासो इत्यादौ गुरोरनृत इति प्लुतादकारात्परस्य सनः सुसुषत्वन्नेति भावः॥ होढ इतीति॰॥ हकारे णकारग्रहणे सति
यद्युत्साप्नोति तस्य सर्वस्याप्युपलक्षणमिदं॥ भाष्ये प्रयत्नभेदोऽक्तो लोरुन्नीतः। तद्यथा स्पृष्टमन[illegible]कथं अनच्त्वं स्पृष्टं करणं स्पर्शा
नां ईषत्स्पृष्टमन्तस्थानाम् विवृतमूष्मणाम् ईषदेवानुवर्तते स्वराणां च ईषद्विवृतम्। ईषदिति निवृत्तम् इति। एवं चेदं प्रत्याख्या
तमिति कैयटीयाः अपरेतु प्रयत्नभेद प्राप्तसावर्ण्याभावानुवादकं सत्स्यैव बोधकमिदम् सूत्रमतएव भाष्ये एतन्न कर्तव्यमि
ति नोक्तमित्याहुः॥ इति कौकिकाप्रकाशे संज्ञाप्रकरणम्॥ छ॥ ननु विकोऽयणचीत्यादावनिर्धारितषष्ठीविषयकषष्ठी स्थाने
योगेति परिभाषोपस्थिते ते रिकः स्थाने इकं विनाश्य यणस्यादिति सूत्रार्थेन शब्दनित्यताहानिरित्यत आह॰। स्थाने चात्र
प्रसंगः इति॥ स्थीयते इति स्थानं भावे ल्युट् दर्भाणां स्थाने शरैः प्रस्तरीतव्यमित्यादौ तथार्थदर्शनात् प्रसंगश्च सति संभवेऽर्थवत

उन्नीतः कृतः इत्य
र्थः =६

* चू पर= एवं चो[illegible] [illegible]
एव अर्थप्रत्यायनार्थं शब्दप्रयोगात्। [illegible] यकार
[illegible]कं घटितशब्दस्यार्थबोधनाय तत्संगतेत्स्वर
घटितशब्दः प्रयोक्तव्य इत्यर्थः संपन्नः एरू इत्यस्य लेल्के
इत्यर्थः एवं सर्वत्र शास्त्रे बोध्यम् अर्थवित एव स्थान्यादे
रीत्या= शाभावविश्रान्तेः

५

तदेतत्सकलमभिसंधायाहुः। स्थानतआन्तर्य्यादिति ॥ स्थानेऽन्तरतमसूत्रसंचारेणेत्यर्थः। एतेन स्थानप्रमाणेभयान्तरतमेह्रस्वेका
रेचदितार्थेयणविधौ दीर्घकथंस्यादिति शङ्कापि निर्दलिता स्थानतआंतर्यस्य सर्वतोबलवत्वात् ॥ ईयत्रानेकविधमान्तर्यमिति
पदिभाषणात्। चतुर्विधमान्तर्यं। स्थानार्थगुणप्रमाणकृतं। स्थानतो दध्यग्र। अर्थतस्तृज्वत्क्रोष्टुरिति। अत्रक्रोष्टुशब्दस्य न प
कृशब्दादेशः ॥ गुणतोवाग्घरीत्यादौ इह घोषवतो महाप्राणस्य हस्य तादृशएव घः। प्रमाणतस्तु अमुममू इत्यादौ अत्रादसो
सेदित्यनेन ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घऽउकारः इयं च परिभाषा स्थानेन्तरतमसूत्रे षष्ठी स्थानेयोगेत्यतः स्थानेग्रहणमनुवर्त
माने पुनः स्थानेग्रहणं वाक्यभेदमाश्रित्य प्रसंगे सति संभवे स्थानत एवांतरतम इत्यर्थसंपादनार्थम्। तेन निष्पन्नेति भाष्येस्पष्टम्
ग्निविधावेतया स्थानतआन्तर्यस्यबलवत्वादेव चेत्तास्तोते त्यादौ प्रमाणतआंतर्यविधानकारणेनेति दिक् ॥ एवं च स्थानेन्तरतमसूत्रेणै
वाग्निर्वाह इत्याहुः। भाष्ये तु दीर्घानामिकपदादिभिरुपस्थितये जातिपक्ष एवाश्रितोऽणुदित्सवर्णस्येति सूत्रे ॥ तद्यथा सव
र्णेऽणग्रहणमपरिभाष्यमाकृतिग्रहणात्सिद्धमेतत्। अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति यथावर्णाकृति
स्तथोवर्णाकृतिरिति। अइउण्सूत्रे भाष्ये अस्य च्वौ चावित्यत्र सवर्णग्रहणं न प्राप्नोति किं कारणं मनणत्वात्। न ह्यग तेऽणो ये
नुवृत्तौ केतर्हि येऽक्षरसमाम्नाये उपदिश्यन्ते इत्याशंक्य जातिपक्ष एवाश्रितः। युक्तश्चायमेव पक्षः अन्यथा शालकलादिप्र
त्याहारेषु सकलशालकलादीनां ग्रहणं दुरुपपादं स्यात् ॥ न चात्र लक्षणाऽलक्षितावच्छेदकाभावात् इति दिक् ॥ तथा चेकप
द प्रतिपाद्यत्वादिजात्यवच्छिन्नानां क्रमेण यणपदप्रतिपाद्ययत्वादिजात्यवच्छिन्ना यकारादयः इको यणचीत्यनेन विधीयंते ॥
अत्र पक्षे यथासंख्यसूत्रेणनिर्वाहः ॥ तदुक्तं ॥ संख्यातानुदेशे नाप्येतत्सिद्धमिति स्थानेन्तरतमसूत्रे भाष्ये ॥ न चाभेदकागुणा इति

पक्षे यथासंख्यत्वेति यथासंख्यबैबम्यमिति वाच्यम् ॥ अणुदित्सूत्रेऽणग्रहणसामर्थ्येन यण्अंशे गुणाभेदका इत्य स्यैव न्याय्यत्वेन भाष्यमानत्वेन च सवर्णानुनासिकानामग्रहणात् ॥

ज्ञापनाय तत्सत्वात् पाठांतरं=१

नानुबन्धकृतमनेकाल्त्वमिति परिभाषाज्ञापनेष्विन तच्चरितार्थ्यात् ॥ ननु नानेकाल् शिदिति सूत्रमस्तु माऽस्तु च सर्वस्येति ग्रहणं ॥ =

न=२ पूर्वसूत्रविषयान्ताद्योरादेशनिषेधेन सर्वादेशतायाएव पर्यवसन्नत्वादिति चेन्न अनन्तरस्येति न्यायेनादेः परस्येत्यस्यैव निषेधापत्तेर्दोषात् ।

यदि तु बाध्यसामान्यचिन्तापक्षमाश्रित्य सर्वस्यापि बाधकं किमिदमुच्यते तर्हि दाऽऽद्यर्थं तद्ग्रहणमित्याहुः ॥ इतिकक्षिकाप्रकी

र्णपरिभाषाप्रकरणम् ॥ नु ननु हृ ध्युपास्य इत्यत्रैकमात्राविच्छिन्नेकारेण द्विमात्रावच्छिन्नेकारो पस्थानात् यण स्याद्वापि च स्वीश

इत्यादौ ह्रस्वोकारेण दीर्घोकारबोधनात् दनापत्तिः उच्चरितः शब्दः प्रत्यायको नानुच्चरित इत्यणुदित्सवर्णस्येत्यग्रभगवदुक्तेः नैव दोषः

प्रत्याहारेषु तद्वाच्यवाच्यलक्षणा स्युपगम्यते तेनैक पदेन वाच्योऽह्रस्वोकारादि लेन वाच्यो दीर्घोकारादिस्तत्र च लक्षणेव त्ति रिति

तदर्थः ॥ नन्वेवं सिद्धेऽणुदित्सवर्णस्येति यर्थमिति वाच्यम् । लक्षतावच्छेदक ज्ञानार्थमेव तच्चरितार्थ्यात् नन्वेवं रीत्या नाऽकाला

वित्यादि विषयेपि लक्षणायां जायमानायां वाक्यावृत्तिसमाप्तिन्यायात् किं विप्रतिपद्येतेति चेन्न । तद्बोधकाले लक्षतावच्छेदकाऽणु

दित्सवर्णबोधाभावस्य प्राङ् निवेदनात् ॥ एवं चैकशब्देन षट् षष्टिवर्णाः गृह्यन्ते यणपदेन चत्वारः यण्पदे तु न लक्षणा भा

च्यमानः सवर्णान्न गृह्णातीति परिभाषया यणा वाच्ययकारादि लक्षोच्या नामभावात् अतो यथासंख्यसूत्रविषयता प्र

गनास्ति ॥ न हि तु तात्पर्यानुपपत्तिर्हि लक्षणाबीजम् ॥ प्रकृते च त्वादिभ्यस्त्यादि यण घटित निर्देशस्य तात्पर्यस्या

नुपपत्त्यास्तु लक्षणा सा च शक्यसंबंध तया शक्ते विषयो या शक्या स्थानार्थी इको यण स्थ चत्वारः एवेति शक्यार्थमादाय

यथासंख्या प्राप्तिरिति चेन्न एवमपि तृतीय चतुर्थाभ्यामृकारल्कारा भ्यां प्रत्येकं त्रिंशद्रूपाभ्यां ल्व र ौ राते देशस्य

स्ववर्णे लादेशस्य च प्रसंगात् अतएव भाष्ये स्थानेऽन्तरतम इत्यस्य किमुदाहरणं दध्यत्र मध्वत्र इक्को यणः स्यान्त्या देशानां संख्या

[illegible]

ननुवांत ग्रहणमेव भाष्ये प्रत्याख्यातम् न चद्देयं जेयुभित्यादौ यान्तादेशापत्तिः योगविभागात् ह्रस्यजय्या वित्येकोयोगः पूर्वेण प्राप्ते नियमार्थः

एच श्चेद्यान्तादेश स्तर्हि ह्रय्यजय्योरेव ततः शक्यार्थे ह्रय्यजय्योः शक्यार्थ एव तेनार्हार्थे द्देयं पापमित्यादौ न दोषः ॥ न च ह्रय्यजय्यो रिति संज्ञा

६ तीया पेदत्वा देकारांशे नियमे ऐकारांशे नियमाभावाद्रायमिच्छति रैयतीत्यत्र यान्तापत्तिः रायश्छन्दस इति भाष्योक्ते श्छन्दसि दृष्टानुवि-

विधायित्वेन रूपान्तरानापादनात् यादौ प्रत्यये रै शब्द श्छन्दसि वर्तते इति कैयटः । एतत्सर्वं स्यानेंतरतम सूत्रे भाष्ये स्पष्ट मिति चेत्

॥ एवं तर्हि वार्त्तिक एव प्रश्लेष उचित इत्यभिप्रेत्याह ॥ छकारादेति ॥ अन्ये तु छांदसत्वान्न लोपो गव्यूतौ छन्दसि दृष्टानुविधा-

८ यित्वेन रूपान्तरानापादनात् अध्वपरिमाणे पि संज्ञा शब्दत्वान्न लोपः संज्ञात्वभंगापत्तेः अत एव रघुनाथ शब्दादौ पूर्वपदात्सं-

ज्ञाया मिति नित्य णत्वाभावः अत एव भ त्रोऽसंज्ञाया मिति तृतीये भाष्ये ऽसंज्ञाया मवधेयाया मिति नार्थः किं तर्हि तत्तत्कार्य विशि-

दभा=९ ष्टत्वेन चेत्संज्ञा सम्मतेत इत्युक्तम् ननु सर्वादीनीति सूत्रे सर्वनामानी त्यत्र णत्वं प्राप्नोतीत्याशंक्य निपातनान्नत्वाभावः इत्युक्तं

भाष्ये तन्मतेत्वमते पूर्वोक्तिपक्षयो र्निर्दलत्वापत्तिः संज्ञा शब्दे नैव तन्निर्वाहादिति चेन्न आधुनिक विनियोगस्थले शास्त्रानुगतस्यै-

व विनियोग उचितो न तु शास्त्रविरुद्धस्येत्याशयात् सर्वनामानीति त्वाधुनिको विनियोगः ॥ अत एव महत्याः संज्ञायाः करणेण

तत्प्रयोजनमित्यग्निम भाष्यं संगच्छते अनादि विनियुक्तस्थलेतु यथा विनियुक्तानामेव साधुत्वं तथा रघुनाथशब्दादाविति दि-

क् ॥ नन्वेवमपि मोराजिसमः क्वावित्यादीनां वैयर्थ्यापत्तिः सम्राडिति राजविशेषस्य संज्ञात्वेनानुस्वाराभावस्यैव वक्तुं शक्यत्-

त्वादिति चेन्न । तस्य संज्ञात्वस्य प्रमाणिकैरनुक्तेः संज्ञाया एक निवेशनीत्वेन वाक्यार्थसाम्राज्य मित्याद्यभियुक्त प्रयोगा-

नापत्तेश्च अत एव तत्र संज्ञा नयात्वाच्च न खमुखात्संज्ञाया मित्यादे रपि सामर्थ्यादुक्तार्थे तात्पर्य ग्राहकताया कैं तुं श-

क्यत्वाच्च अप्रमितस्य तु वकार प्रश्लेषस्यो कार्थे तात्पर्यग्राहकत्वरूप फलकत्वकल्पनस्य निष्फलत्वाच्च एतेन नखमुखा दित्यादे-

वैयर्थ्यादुक्त कल्पनानयुक्तेति मंदोक्तमपास्तम् ॥ तन्निमित्तस्ये वेति किमिति ॥ पूर्वेण सिद्धावस्य नियमार्थत्वे नैव एवकारे लब्धे

तात्पर्यार्थः =)

व=३

शिवः ६

अएऽप्रत्याख्यानपक्षे प्यारंभप्रत्याख्यानयोः फलाभेदाय भेदक पक्षस्यैवाश्रयणात् । अत एव मतुपो नानुनासिको वकारः न च स्वौज ।
सि त्वत्रानुनासिको कारस्थाने सानुनासिकवकारः न च पथिमथ्यृभुक्षामादित्यत्रैत्राकारप्रश्लेषक्लेश इति वक्ष्यते ननु भाष्यमानः सवर्णा
न्न गृह्णातीति परिभाषासत्वे पूर्वोक्तानि सिध्यंतु नाम तज्ज्ञापकं त्वप्रत्ययग्रहणं तदप्यणुदित्प्रत्याख्यानेनैव दूषितप्रायमिति चेन्न ।
प्रत्याख्यानपक्षेपि तपरसूत्रस्य जातिपक्षप्राप्तसवर्णग्रहणनियमार्थत्ववत् जातिग्रहणप्राप्तसवर्णग्रहणप्रतिषेधाया प्रत्यय इत्यंशः
कर्तव्य एवेत्याशयात् तदुक्तं नित्वेदं ज्यादादीयस इत्यत्र वक्ष्ये भाष्ये प्रत्ययकं नागेशीये अत एव जातिपक्षेपि त्यदाद्ी नाम इत्यादौ नदीवीप्
संग्रहः त्वादिभ्य इत्यादि निर्देशो जातिपक्षाश्रयणेमानम् तस्मा जातिपक्ष एव भगवताभिप्रेत इत्याहुः ॥ ईकारस्य यकार इति ।
ईकारोच्चारणप्रसंगे यकारो उच्चारणीय इत्याशयः उपपादितश्चायंमाक् । न च हसु धीशब्दस्य ध्यायतेः संप्रसारणे संप्रसारणा ।
च्चेति पूर्वरूपापत्तेः यणनस्यात् मैवम् संप्रसारणपूर्वत्वे समानांगग्रहणं कर्तव्यमिति वार्तिकोक्तेः । न च नभूसुधियोरिति प्रति
षेधः अंगाधिकारस्थितत्वेन प्रत्यये परतः एव तेन निषेधात् अनंतरोक्तयोरेर नेकाच ओ सुपि इत्यनयोरेव प्रतिषेधाच्च ॥
न चेको सवर्णे इति ह्रस्व संगतः न समासे इति वार्तिकोक्तेन निषेधात् ॥ न च नित्यसमासस्यैव तेन निषेध इति वाच्यम् नित्याग्र
हणस्य भाष्ये प्रत्याख्यानात् इति संक्षेपः श्रीरस्तु ननु यद्यपि गव्यमित्यादौ मत्वा ऽप्यक्षाकल्पस्य हलि सर्वेषामिति वा लो
+ पो न प्राप्नोति तथापि गव्यूतौ नेत्यत आह ॥ वान्त इत्यगेति ॥ न च सूत्रे फलाभावो गव्यादौ भत्वेनवारणात् न च गामिच्छतीति गव्य
तीत्यादौ फलम् तत्रापि नःक्ये इति नियमेन नान्तस्यैव पदत्वप्रतिपादनेनेतरेषां भत्वबोधनादिति वाच्यम् वै वान्ते इत्यस्य सार्थ
केनुवृत्त्या श्रूयमाणवकारान्तादेशार्थ संपादनफलकत्वात् ननु विभाषाग्व इत्यादौ तस्य लोप इति दुर्निवारं गव्यूतानुच्चारण ।
स्य चारितार्थ्यादिति चेन्न गविच युक्त इत्यादि निर्देशे लक्षा रणात् ननु लोपो व्योर्वलीति कथं व लोपो नहि कार्यी निमित्त
तया श्रीयते नहि निमित्तं कार्यित्वेनेति परिभाषयावस्य कार्यित्वे न निमित्तवाधादिति चेन्न निमित्तत्वानाक्रान्तविषयेक्त्वा । प्रि

॥ वि॰ ५ ॥
त्वस्य चरितार्थत्वात् न च लोपो व्योर्वलीति कारो मा भाव परत
प्रत्याख्यानात् प्रत्याख्यानस्य लोके कि ह र स्य भाव अत एव अतो
यः शास्त्रीयप्रयोगापेक्षितत्वादित्याशयात् अत एव तदेव अक्षर इत्यु क्तमिको गुण इति सू



६ न चात्रापि पदे विनिगमनाविरहात् आवत्सन्त्वीति साधयित्वा कानीति निष्पादने दोषतावस्थाभाव इति वाच्यम् अंतरंगबहिरंगयो
रन्तरंगं बलवदिति ज्ञापयिष्यमाणपरिभाषया ऽगपूर्वोपस्थितं निमित्तत्वमंतरंगमाश्रया ऽन्तरंगाण्त्वम् प्रथमप्रवृत्तिरिति कानी
तावत=३ त्यस्यैवं साधनीयत्वात् ॥ तन्निषेधादिति ॥ नपदान्तेति सूत्रेण ष्टुत्वनिषेधादित्यर्थः ॥ न च तस्मिन्सति षिड्डपि बहिरंगपरि
भाषया लोपस्यासिद्धत्वेन यणादिकं दुर्वारम् । पदद्वयापेक्षत्वेन यणादेरेव बहिरंगत्वात् नजानंतर्ये बहिष्ट्वप्रक्लृप्तिरिति निषेधा
७ च्चेतिदिक् ॥ स्थानान्तरतम्यादिति ॥ स्थानत इति भावः ॥ रेफशिरस्कस्यादित्यस्य रेफधारा ऋकारेण मूर्द्धादिस्थानत्वात् अयं
भावः । उरण्सूत्रे षष्ठीस्थाने स्थानेंतरे इति सूत्रांशा स्थाने शब्दद्वयमनुवर्तते तत्रैकस्यानुवादेपि स्थानसंबंधलाभो द्वितीयस्य ल
क्षणया प्रसंगभावस्थानकालबोधकः प्रयोजनं तेन गुणवृद्ध्योः प्राप्त्यवस्थायामेवाणेरपरस्सम्पन्न इति प्रमाणतोन्तरतमावेडौ
चोपाधित्वात् स्थानतोऽभ्यं भवति इति तदाह ॥ कृष्णर्द्धिरित्यादीति ॥ न चैवं कर्त्तेत्यादावनेकालत्वात् सर्वादेशप्रसंगः ॥ अस्यानिल्त्वमुपजीव्य
प्रवृत्तस्य रपरत्वस्य सर्वादेशतानापादनादुपजीव्यविरोधात् ॥ तदुक्तं ॥ स्थानेंतरतमसूत्रे वार्त्तिककृता सर्वादेशप्रसंगस्त्वनेकाल्त्वात् ॥
रा=१० न चानेकाल्त्वस्य तदाश्रयत्वात्सर्वादेशस्यापि घात इति ॥ न च यो रोऽनादिष्वणरवे परक्ततोन क्रीयते इत्याशङ्क्येति वाच्यम् अना
देशत्वात् आदेशत्वं हि समुदाये विश्रान्तं ॥ नन्वेवं कृष्णर्द्धिरित्यादौ पूर्वपरसमुदायस्य स्थानित्वेन ऋकारस्यानित्वाभावा
त्स्यादिति चेन्न । पूर्वपरयोरिति द्विवचननिर्देशेन संहितयोरवयवयोरेव स्थानित्वात् ॥ तदुक्तं भाष्ये ॥ योह्युभयोः स्था
ने भवति लभतेऽसावन्यतरतो व्यपदेशमिति ॥ अत एव भिन्नादिष्विव द्वयोः स्थानिनोर्दीर्घादेशो माभूतामित्येकग्रहणम् ॥ १ ॥
गुण इत्यादि विधेयकत्वेन तन्नैकत्वसंख्याया विवक्षणेनोभयोः पूर्वपरयोरेकतरयैव विधेयान्वयेऽनयोः पूलयोः कटं कुर्वीत्या
दाविवोभयसंबंधेक विधेयस्य प्रतीतेरेकग्रहणं स्पष्टार्थमित्यन्ये तत्त ॥ न च सर्वत्र विधावादेशानृणवरल परान् विधाय

लक्ष्य मित्यादेः पूर्वेणैव सिद्धत्वेः सूत्रमेव किमर्थं इति प्रयोक्तुराशयः ॥ उत्तरमाह ॥ ज्योयत इति ॥ आङ्पूर्वादेजः कर्मणि लटि यगादित्वा
त्संप्रसारणे ऽकृत्सार्वधातुकयोरिति दीर्घे आङः सवर्णदीर्घे कृते वांतादेशाप्रवृत्तिः ॥ अथ पूर्वं धातुः साधनेन युज्यते इति भाष्यसिद्धांतप
क्षे यदुपसर्ग निमित्तं कार्यं मुपसर्गाश्रितं तदन्तरंगः विशिष्टोपसर्ग निमित्तत्वात ॥ यच्चनतथाभूतं तत्र पूर्वागतसाधन निमित्तकमे
वांतरंगम् ॥ अतएव प्रेन्ध इत्यत्र गुणोपबहिरंग इति नधातुलोप सूत्रे भाष्ये कैयटयोरुक्तम् ॥ तथा चात्र धातूपसर्गकार्यस्य गुण
स्य बहिरंगत्वादन्तरङ्गे वान्तादेशे ऽसिद्धत्वान्नोक्तदोषावकाशः इत्यपदितोपाठाह ॥ ओयतेति ॥ ननु नाजानन्तर्ये बहिष्ट्वप्रक्लृप्ति
रिति निषेधादप्रवृत्युदाहरणमिति चेन्न यगकार्यविधावानन्तर्येणाचोराश्रयणे तत्रैव परिभाषा प्रवृत्तेः ॥ यथा तद्वत्तु तत्रा
हि इकोयणचीति वचनादिगचो नाश्रयणेऽपि तु न तथेति दिक् ॥ वेत्रम् एवं कर्मणि लङि यकि संप्रसारणे दीर्घे आटासहाटश्चेति वृद्धौ
वान्तापत्तिः नत्वत्र धातूपसर्गकार्यमस्तिये नासिद्धत्वं स्यादितुक्तम् ॥ कानिः सन्तीति ॥ अयंभावः ॥ अस्ति तावत्सिद्धान्तग्रंथेषु तत्रोप
निबद्धं पक्षद्वयं ॥ पदसंस्कारो वाक्यसंस्कारश्चेति ॥ तत्र परस्परनिरपेक्षाणि पदानि संस्क्रियन्ते साधुत्वेनान्वाख्यायन्ते यत्रेति बाहुल
कादधिकरणे घञ् ॥ अतएव शुष्मप्युपवदे इत्यादीनि निर्वहंते ॥ तदुक्तम् ॥ संस्कृतासंस्कृत्य पदान्युत्सृज्यन्ते तेषां च यथेष्टमभि
संबंधो भवत्याहरपात्रं पाग माहरे तिच ऋराहैःसूत्रे भाष्ये वाक्यसंस्कारस्तु वाक्यात्सुप्तिङन्तस्य परस्परास्पृक्षाणि संस्क्रियन्ते य
त्रेति तथोक्तः यद्यपि वाक्यमखण्डं निरवयवं ततएवार्थप्रतीतेर्लोके तस्यैव प्रयोगाश्च तथाप्यन्वाख्यानलाघवाय तत्रावयवं कल्पयित्वा
शास्त्रं सफली क्रियत इत्यलमत्र विस्तरः ॥ तदप्युक्तं ॥ वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चनेति भाष्ये । तथा चाद्यपक्षे कानि सन्तीत्यनयोः पार्थक्ये
प=२ निष्पन्नत्वादचः परस्मिन्नित्यस्याप्रवृत्तेर्न चोद्यावसरः । किंतु । वाक्यसंस्कारे कानि सन्तीति वाक्ये प्रक्रियाक्रमे किम् शब्दोत्तरं जस् तदुत्तरमस
धातोर्लटीति किमः कादेशे जसः शीभावे नुमि दीर्घे अस धातोः श्नसोरल्लोपे ऽन्त इत्यन्तादेशे चाचः परस्मिन्नित्यनेन परनिमित्तको
लोपः स्थानिवत्स्यात्तनिभूतादकारात् पूर्वत्वेनदृष्टस्य
नकारोत्तरीयेकारस्य यणरूपेविधौ कर्तव्ये स्थानिवद्भावा
॥ दिति चोद्यावसरः ॥

न्सेतुलाकौमुदी टीका पाद्धि
का प्रकाशः
॥४४॥

6183

∞ F 8

Complete